समवायिकारणविसदृशकार्य्योत्पत्तिः । यथा, सांख्यतत्त्वकौमुद्याम् ।
"एकस्य सतो विवर्त्तः कार्य्यजातं न तु वस्तु सत् ।")

विवर्त्तनं, क्ली, परिभ्रमणम् । विपूर्व्वकवृतधातोरनट् ( ल्युट् ) प्रत्ययेन निष्पन्नम् ॥ ( यथा, किराते । ५ । ४० ।
"कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु ॥")

विवशः, त्रि, (विरुद्धं वष्टीति । वि + वश + अच् ।) अवश्यात्मा । अरिष्टदुष्टधीः । इति मेदिनी ॥ हे आसन्नमरणसूचितलक्षणेन दूषितबुद्धौ । विरुद्धं वष्टि विवशः अल् । आसन्नमरणख्यापकं लिङ्गमरिष्टम् । तेन दुष्टा धीर्यस्य स तथा । इत्यमरटीकायां भरतः ॥

विवस्वती, स्त्री, सूर्य्यनगरी । इति मेदिनी ॥

विवस्वान्, [त्] पुं, ( विशेषेण वस्ते आच्छादयतीति । वि + वस + क्विप् । विवस्तेजोऽस्यास्तीति । विवस् + मतुप् । मस्य वः । "तसौ मत्वर्थे ।" १।४।१९ । इति भत्वादुत्वाभावः । ) सूर्य्यः । ( यथा, किराते । ५ । ३८ ।
"भवति दीप्तिरदीपितकन्दरा
तिमिरसंवलितेव विवस्वतः ॥" )
अर्कवृक्षः । इत्यमरः ॥ देवता । इति मेदिनी ॥ अरुणः । इति शब्दरत्नावली ॥ वैवस्वतमनुः । इत्यजयः ॥ (मनुष्यः । इति निघण्टुः ।२।३।२४॥ "वस निवासे इत्यस्मात् 'अन्येभ्योऽपि दृश्यन्ते' इति क्विप् । दृशिग्रहणात् भावे भवति । विविधं वसनं विवः । तद्वन्तो विवस्वन्तः । सर्व्वस्यापि मनुष्यस्य यत्किञ्चित् विवसनमस्ति ;" इति तट्टीका ॥ * ॥ परिचरणशीले, त्रि । यथा, ऋग्वेदे । १० । ६५ । ६ ।
"देवेभ्यो दाशद्धविषा विवस्वते ॥"
"हविषा अन्नेन देवान् विवस्वते परिचरते ।" इति तद्भाष्ये सायणः ॥)

विवाकः, त्रि, विवेचनकर्त्ता । यथा,—
"अर्थिप्रत्यर्थिनोर्व्वचनं विरुद्धाविरुद्धं सभ्यैः सह विविनक्ति विवेचयति वा विवाकः ।" इति मिताक्षरा ॥

विवादः, पुं, विरुद्धो वादो विवादः । स च धनविभागादिविषयन्यायादिः । इति भरतः ॥ तत्पर्य्यायः । व्यवहारः २ । इत्यमरः ॥ ऋणादिन्यायः ३ । इति जटाधरः ॥
"ऋणादिदायकलहे द्वयोर्ब्बहुतरस्य वा ।
विवादो व्यवहारश्च द्वयमेतन्निगद्यते ॥"
इति शब्दरत्नावली ॥ * ॥
मात्रादिना विवादनिषेधो यथा,—
"आचरेत् सर्व्वधर्म्मं तद्विरुद्धन्तु न चाचरेत् ।
मातापित्रतिथीत्युचैर्विवादं नाचरेत् गृही ॥"
इति गारुडे ९६ अध्यायः ॥ * ॥
अष्टादश विवादस्थानानि यथा,—
"तेषामाद्यमृणादानं निःक्षेपोऽस्वामिविक्रयः ।
सम्भूय च समुत्थानं दत्तस्यानपकर्म्म च ॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः ॥
सीमाविवादधर्म्मश्च पारुष्ये दण्डवाचिके ।
स्तेयञ्च साहसञ्चैव स्त्रीसंग्रहणमेव च ॥
स्त्रीपुंधर्म्मो विभागश्च द्यूतमाह्वयमेव च ।
पदान्यष्टादशैतानि व्यवहारस्थिता विदुः ॥"
इति मनुः ॥
अस्यार्थः । स्वधनस्यान्यस्मिन्नर्पणरूपो निक्षेपः । अस्वामिना च कृतो विक्रयः । सम्भूय वणिगादीनां क्रियानुष्ठानम् । दत्तस्य धनस्यापात्रबुद्ध्या क्रोधादिना वा ग्रहणम् । कर्म्मकारस्य भृतेरदानम् । कृतव्यवस्थातिक्रमः । क्रये विक्रये च कृते पश्चात् या विप्रतिपत्तिः । स्वामिपशुपालयोर्विवादः । ग्रामादिसीमाविप्रतिपत्तिः । वाक्पारुष्यं आक्रोशनादि । दण्डपारुष्यं ताड़नादि । स्तेयं निह्नवेन धनग्रहणम् । साहसं प्रसह्य धनहरणादि स्त्रियाश्च परपुरुषसम्पर्कः । स्त्रीसहितस्य पुंसो धर्म्मव्यवस्था । पैतृकादिधनस्य विभागः । द्यूतं अक्षादिक्रीड़ा । आह्वय पणव्यवस्थापूर्व्वकं पक्षिमेषादिप्राणियोधनम् । इति कुल्लूकभट्टः ॥ ( कलहः । यथा, रघुः । ७ । ५३ ।
"परस्परेण क्षतयोः प्रहर्त्रो-
रुत्क्रान्तवाय्वोः समकालमेव ।
अमर्त्त्यभावेऽपि कयोश्चिदासी-
देकाप्सरःप्रार्थितयोर्विवादः ॥")

विवादानुगतः, त्रि, (विवादं अनु गतः ।) विवादकर्त्ता । यथा, मिताक्षरायाम् ।
"विवादानुगतं पृष्ट्वा ससभ्यस्तत् प्रयत्नतः ।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः ॥"

विवादी, [न्] त्रि, ( विवादोऽस्यास्तीति । विवाद + इनिः । ) विवादकर्त्ता । यथा,—
"अनुभावी च यः कश्चित् कुर्य्यात् साक्ष्यं
विवादिनाम् ॥"
इति व्यवहारतत्त्वम् ॥

विवाहः, पुं, ( विशिष्टं वहनम् । वि + वह + घञ् । ) उद्वाहः । दारपरिग्रहः । तत्पर्य्यायः । उपयमः २ परिणयः ३ उद्वाहः ४ उपयामः ५ पाणिपीड़नम् ६ । इत्यमरः ॥ दारकर्म्म ७ करग्रहः ८ । इति शब्दरत्नावली ॥ पाणिग्रहणम् ९ निवेशः १० पाणिकरणम् ११ । इति जटाधरः ॥ स चाष्टविधः । यथा,—
"ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता ।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥
यज्ञस्थायर्त्विजे दैवमादायार्षस्तु गोयुगम् ।
चतुर्द्दशप्रथमजः पुनात्युत्तरजश्च षट् ॥
इत्युक्त्वा चरतां धर्म्मं सह या दीयतेऽर्थिने ।
सकायः पावयेत्तज्जः षड्वंश्यांश्च सहात्मना ॥
आसुरो द्रविणादानात् गान्धर्व्वः समयान्मिथः ।
राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात् ॥"
इति याज्ञवल्क्यः ॥ * ॥
अपि च ।
"गृहीतविद्यो गुरवे दत्त्वा च गुरुदक्षिणाम् ।
गार्हस्थ्यमिच्छन् भूपाल कुर्य्याद्दारपरिग्रहम् ॥
वर्णैरेकगुणां भार्य्यामुद्वहेत्त्रिगुणः स्वयम् ।
नातिकेशामकेशां वा नातिकृष्णां न पिङ्गलाम् ॥
निसर्गतोऽधिकाङ्गीं वा न्यूनाङ्गीमपि नोद्वहेत् ।
अविशुद्धां सरोमां वाकुलजां वातिरोगिणीम् ॥
न दुष्टां दुष्टवाचाटां व्याङ्गिनीं पितृमातृतः ।
न श्मश्रुव्यञ्जनवतीं न चैव पुरुषाकृतिम् ॥
न घर्घरस्वरां क्षामवाक्यां काकस्वरां न च ।
नानिबद्धेक्षणां तद्वद्वृत्ताक्षीं नोद्वहेद्बुधः ॥
यस्याश्च रोमशे जङ्घे गुल्फौ चैव तथोन्नतौ ।
कूपौ यस्या हसन्त्याश्च गण्डयोस्तांश्च नोद्वहेत् ॥
नातिरूक्षच्छविं पाण्डुकरजामरुणेक्षणाम् ।
आपीनहस्तपादाश्च न कन्यामुद्वहेद्बुधः ॥
न वामनां नातिदीर्घां नोद्वहेत् संहतभ्रुवम् ।
न चातिच्छिद्रदशनां न करालमुखीं नरः ॥
पञ्चमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीम् ।
गृहस्थश्चोद्वहेत् कन्यां न्यायेन विधिना नृप ॥
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।
गान्धर्व्वराक्षसौ चान्यौ पैशाचश्चाष्टमोऽधमः ॥
एतेषां यस्य यो धर्म्मो वर्णस्योक्तो मनीषिभिः ।
कुर्व्वीत दाराहरणं तेनान्यं परिवर्ज्जयेत् ॥
स धर्म्मचारिणीं प्राप्य गार्हस्थ्यं सहितस्तया ।
समुद्वहेद्ददात्येतत् सम्यगूढं महाफलम् ॥"
इति विष्णुपुराणे ३ अंशे १० अध्यायः ॥ * ॥
अन्यच्च ।
याज्ञवल्क्य उवाच ।
"शृण्वन्तु मुनयो धर्म्मान् गृहस्थस्य यतव्रताः ।
गुरवे च धनं दत्त्वा स्नात्वा च तदनुज्ञया ॥
अविप्लुतब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्व्विकां कान्तामसपिण्डां यवीयसीम् ॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ।
पञ्चमात् सप्तमादूर्द्ध्वं मातृतः पितृतस्तथा ॥
दिपञ्चनवविख्यातात् श्रोत्रियाणां महाकुलात् ।
सवर्णः श्रोत्रियो विद्वान् वरदोषान्वितो न च ॥
यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः ।
न तन्मम मतं यस्मात्तत्रायं जायते स्वयम् ॥
तिस्रो वर्णानुपूर्व्वेण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्य्या वा शूद्रजन्मनः ॥
ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता ।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥
यज्ञस्थायर्त्विजे दैवमादायार्षस्तु गोयुगम् ।
चतुर्द्दश प्रथमजः पुनात्युत्तरतश्च षट् ॥
इत्युक्त्वा चरतां धर्म्मं सह या दीयतेऽर्थिने ।
सकायः पावयेत्तज्जः षड्वंश्यानात्मना सह ॥
आसुरो द्रविणादानात् गान्धर्व्वः समयान्मिथः ।
राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात् ॥
चत्वारो ब्राह्मणस्याद्यास्तथा गान्धर्व्वराक्षसौ ।
राज्ञस्तथासुरो वैश्ये शूद्रे चान्त्यस्तु गर्हितः ॥
पाणिर्ग्राह्यः सवर्णासु गृह्णीत क्षत्रिया शरम् ।
वैश्या प्रतोदमादद्याद्वेदने चाग्रजन्मनः ॥